Reg. No. | | | | | | | | | |

# BCMSKL 281

**Choice Based Credit System IV Semester B.Com. Degree Examination, September 2022**
**(2020 – 21 Batch Onwards)**
**SAMSKRITAM**
**Samskrit Language**

Time : 3 Hours Max. Marks : 80

*सूचना : – 1) **संस्कृत**भाषया, **कर्णाटक**भाषया, **आंग्ल**भाषया वा उत्तराणि लिखत ।*
*2) यत्र संस्कृतेन लिखत इति सूचना वर्तते तत्र **संस्कृते**नैव उत्तरं लिखत ।*

I. अधोनिर्दिष्टेषु **द्वयं** अनुवादं कृत्वा कर्णाटकभाषया आंग्लभाषया वा विवृणुत । **(2×5=10)**

1.1) आन्वीक्षकी त्रयी वार्ता दण्डनीतिश्चेति चतस्रः विद्याःयासु च राज्ञः अकुण्ठा गतिर्भवेत् । विद्यया विनयः । विनयेन च तन्मार्गे गमनम् । विद्याविनयाभ्याम् इन्द्रियजयः । राज्ञः जितेन्द्रियत्वम् स्वस्य राष्ट्रस्य च उत्कर्षाय । सबन्धुराष्ट्रा राजानः विनेशुरजितेन्द्रियाः । न हि स्वयमविनीतः कश्चित् प्रजानां विनये प्रभवेत् । किञ्च युक्तायुक्तविवेकोदयोऽपि शास्त्राध्ययनस्य फलम् । अविवेकिनि राजनि सर्वं विपरीतमापद्येत । सैषा हि आधुनिकी स्थितिः । अनधीतराजविद्याः । अविनीताः अजितेन्द्रियाश्च सन्ति बहवः ये स्वयं न जानन्ति अन्यान् न ज्ञापयितुं प्रभवन्ति ।

1.2) साधारणं द्वयं ह्येतद् दैवमुत्थानमेव च ।
पौरुषं हि परं मन्ये दैवं निश्चितमुच्यते ।
दैवं अदृष्टम् । उत्थानमिति पौरुषम् । अदृष्टं नान्यथायितुं शक्यते । यद्भावि तद् भवति । अलमदृष्टचिन्तया । दृष्टं तु पौरुषं चिन्त्यताम् । यतो विना पुरुषकारं दैवमपि न फलाय । विना पुरुषकारं लभ्यमत्यलभ्यं भवेत् । तस्मात् पुरुषेण पुरुषकारवता भाव्यमित्येतत् । यत आहुः– उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः '' इति । चलन् पतेदपि । न चलन् न पदमपि गच्छति ।

1.3) ज्योतिश्शास्त्रे होरस्कन्धः प्राधान्येन फलज्यौतिष मित्युच्यते । अत्र च जातक – प्रश्नमुहूर्तनिमित्तानि इति चतुर्विभागाः सन्ति । परं फलनिरूपणपरौ प्रधानविभागौ जातकं प्रश्नश्चेति । तत्र प्राग्जन्मार्जित–शुभाशुभमिश्रकर्मफलपरिपाकचिन्तनं जातकेन चेत् इहार्जितस्य सदादि–कर्मफलपरिपाकचिन्ता प्रश्नेनेति सुस्पष्टः अनयोर्भेदः । परं तु इहार्जितं तु विज्ञातुं कर्मप्रश्नो विधीयते इत्यनेन इहजन्मार्जितस्यैव शुभाशुभकर्मपरिपाकस्य चिन्तनं प्रश्नशास्त्रेण क्रियते इति नावगन्तव्यम् । यतस्तत्र इहार्जितमित्येवोक्तम् । न तु इहजन्मार्जित इति । अत एव ऐहलौकिकदैवदेवताबाधादयः स्थलदोषबाधादोषादयः प्रश्नेन विचिन्त्यते ।

II. अधोनिर्दिष्टवाक्येषु **पञ्चानां** वाक्यविवरणं कर्णाटकभाषया, आंग्लभाषया, संस्कृतभाषया वा लिखत । **(5×3=15)**

2.1) राज्ञः प्रियहिते रताः ।

2.2) नष्टो मोहः स्मृतिर्लब्धाः ।

2.3) स राजा राजसत्तमः ।

2.4) कृषिर्वाणिज्यं च राष्ट्रस्य नेत्रद्वयमिव ।

2.5) तदा वृष्टिः भवेद् ध्रुवम् ।

2.6) कथं स मे वध्यो भवति ।

2.7) षड्विधं प्रीतिलक्षणम् ।

2.8) जले मत्स्यानिवभक्ष्यन् दुर्बलं बलवत्तरः ।

III. **द्वौ** प्रश्नौ कर्णाटकभाषया, आंग्लभाषया, संस्कृतभाषया वा उत्तरयत । **(2×8=16)**

3.1) आचारनिर्वहणे गीतायाः मार्गदर्शक-वाक्यानि निरूपयत ।

3.2) महाभारतकालीनं करनीतिं अधिकृत्य लिखत ।

3.3) पराशरः कृषिकार्यस्य महत्त्वं कथं प्रतिपादितवान् ? विवृणुत ।

3.4) करालमुखस्य मित्रद्रोहं तत्फलं च कथयत ।

IV. अधोनिर्दिष्टेषु न्याय**द्वयं** कर्णाटकभाषया, आंग्लभाषया, संस्कृतभाषया वा विशदयत । **(2×4=8)**

4.1) अव्यापार-व्यापारन्यायः ।

4.2) उद्योगराघवन्यायः ।

4.3) घट्टकुटीप्रभातन्यायः ।

4.4) नक्रन्यायः ।

V. **द्वौ** कर्णाटकभाषया, आंग्लभाषया, संस्कृतभाषया वा टिप्पणीं रचयत । **(2×6=12)**

5.1) व्यवहारस्तु लोकयात्रा ।

5.2) ग्रामराज्यपद्धतिः ।

5.3) पञ्चतन्त्रम् ।

VI. अधोनिर्दिष्टेषु **षट्**वाक्यानि पाठ्याधारेण पूरयत । **(1×6=6)**

6.1) अर्थशास्त्रम् ________ वेदस्य उपवेदः ।

[ साम, अथर्व, ऋग् ]

6.2) कोषात् ________ प्रजायते ।

[ दण्डः, पृथिवी, राजा ]

6.3) गीता गुरुशिष्ययोः ________ इव वर्तते ।

[ सलापः संवादः, विवादः ]

6.4) ________मा स्म गमः पार्थ ।

[ मौढ्यं, जाड्यं, क्लैब्यम् ]

6.5) कालस्य कारणं ________।

[ राजा, मन्त्री, देवः]

6.6) कृषिः सर्वा ________मूला ।

[ यत्न, बीज, वृष्टि ]

6.7) प्रीतेः लक्षणं ________ विधम् ।

[ अष्ट, नव, षट् ]

6.8) महिलारोत्यनगरस्य राजा ________।

[ अमरदेवः, समरगुप्तः, अमरशक्तिः]

VII. संयोजयत । **(5×1=5)**

7.1) चाणक्य: – भिक्षां प्राप्नोति ।

7.2) हितोपदेश: – वराहमिहिर: ।

7.3) असमर्थ:कृषक: – परधर्म: ।

7.4) बृहज्जातकम् – नारायणपण्डित: ।

7.5) लब्धप्रणाश: – विष्णुगुप्त: ।

पञ्चतन्त्रम् ।

VIII. अधोदत्तेषु **एकं** पत्रं संस्कृते लिखत । **(8×1=8)**

8.1) नारायण प्रेस्, नारायणपुरम् बेङ्गलूरु संस्थाया: प्रति

– लीलावती – २० प्रतय:

बृहज्जातकम् – २० प्रतय:

रामायणम् – २० प्रतय:

पुस्तकप्रेषणार्थं संयुक्तपत्रेण सह एकं आदेशपत्रं लिखत ।

8.2) कालिदासविद्यालय:, कालिदासनगरम् मैसूरु मण्डलम् प्रति संस्कृत उपन्यासकविषये स्वविवरणेन सह उद्योगार्थं अभ्यर्थनापत्रम् लिखत ।